07-06-2021

अनिवार्यपत्रम् । शास्त्री-II

व्याकरणछात्रहेतवे । साहित्यम् । रघुवंशम् । श्लोकव्याख्या ।

" क्रियाप्रबन्धादयमध्वराणामजस्रमाहूतसहस्रनेत्रः ।
शच्याश्चिरं पाण्डुकपोललम्बान्मन्दारशून्यानलकांश्चकार ॥"

सन्दर्भः → प्रस्तुतोऽयं श्लोकः कविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य इन्दुमतीस्वयंवरवर्णनादुद्धृतोऽस्ति ।
अत्र कविः परन्तपस्य कृतकार्यं वर्णयति ।

अन्वयः → अयम् अध्वराणां क्रियाप्रबन्धात् अजस्रम् आहूतसहस्रनेत्रः सन् चिरं शच्याः अलकान् पाण्डुकपोललम्बान् मन्दारशून्यान् चकार ।

शब्दार्थः व्याकरणञ्च → अयम् = असौ परन्तपः नृपः । अध्वराणाम् = यज्ञानाम् । क्रियाप्रबन्धात् = सततानुष्ठानप्रयत्नात् ।
अजस्रम् → नञ् + जस् + र = अविच्छिन्नम्, अनवरतम् ।
आहूतसहस्रनेत्रः → आहूतः सहस्राणि नेत्राणि येन सः = आहूतं इन्द्रं येन सः परन्तपः । शच्याः = इन्द्रपत्न्याः ।
अलकान् = कचान् । पाण्डुकपोललम्बान् → पाण्डुकपोलयोः लम्बाः तान् = पीतगण्डस्थलपतितान् । मन्दारशून्यान् = कल्पतरुसुमनविगतान् । चकार = कृतवान् ।

तात्पर्यः → सुनन्दा इन्दुमतीं कथयति यत् एष परन्तपः अनवरतानुष्ठाय निजयज्ञे पुनः पुनः देवेन्द्रम् आह्वयति । यज्ञे देवतरुसुमनानां प्रयोगं करोति अतएव इन्द्राण्याः केशपाशः (केशकलापः) सुमनरहितः अस्ति ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः,
वैदर्भीरीतिः, माधुर्यगुणः,
अनुप्रासालङ्कारः, उपजातिछन्दश्च ।

(हस्ताक्षर) 07-06-2021
डॉ० निर्मल कुमार झा,
स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

साहित्यम् (प्रतिष्ठा) शास्त्री III 07-06-21

अष्टम् पत्रम् । मालविकाग्निमित्रम् । श्लोकव्याख्या ।

"कार्त्स्न्येन निर्वर्णयितुं च रूपमिच्छन्ति तत्पूर्वसमागमानाम् ।
न च प्रियेष्वायतलोचनानां समग्रवृत्तीनि विलोचनानि ॥"

प्रसङ्गादि पूर्वश्लोकव्याख्यानुसारेण ।

अत्र राजाग्निवर्णः स्त्रीजात्याः स्वभाववर्णनं करोति ।

**अन्वयः** → तत्पूर्वसमागमानां रूपं कार्त्स्न्येन निर्वर्णयितुम् इच्छन्ति च आयतलोचनानाम् विलोचनानि प्रियेषु समग्रपातीनि (समग्रवृत्तीनि) न च ।

**शब्दार्थाः व्याकरणानि च** → तत्पूर्वसमागमानाम् → स एव पूर्वः समागमो येषां तथाभूतानाम् = प्रथममिलनानाम् । रूपम् = सौन्दर्यम् । कार्त्स्न्येन = पूर्णरूपेण । निर्वर्णयितुम् = द्रष्टुम् । इच्छन्ति = अभिलषन्ति । आयतलोचनानाम् = आयते लोचने यासां ताः तासाम् = विशालनेत्राणाम् (वनितानां) । विलोचनानि = नेत्राणि । प्रियेषु = प्रियतमजनेषु । समग्रवृत्तीनि (समग्रपातीनि) = पूर्णरूपेण निपतनशीलानि । न = नहि (भवन्ति) ।

**अलङ्कारः** → अप्रस्तुतप्रशंसा → अप्रस्तुतप्रशंसा या सा प्रस्तुताश्रया ।

**छन्दः** → उपजातिः (प्रथमे तथा द्वितीये चरणयोः इन्द्रवज्राछन्दः, तृतीये तथा च चतुर्थे चरणयोः उपेन्द्रवज्रा छन्दः ।)

"स्यादिन्द्रवज्रा यदि तौ जगौ गः ।"

"उपेन्द्रवज्रा जतजास्ततो गौ ।"

07-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

07-06-21

उपशास्त्री

अनिवार्यप्रथमपत्रम् ।

संस्कृतानुवाद: →

सभी लकारों में पुरुषों तथा वचनों के आधार पर ये ही कर्तृपद व्यवहृत होते हैं। अन्यान्य व्याकरण के नियमों के आधार पर कभी-कभी कर्तृपदों का तृतीयान्त रूप दृष्टिगत होता है। यथा → मया चन्द्र: दृश्यते (मेरे द्वारा चन्द्रमा देखा जाता है), त्वया हस्यते (तुमसे हँसा जाता है)। वाच्यपरिवर्तन पढ़ने-पढ़ाने के क्रम में इस पर चर्चा होगी।

लट् (वर्तमानकाल) लकार के कुछ वाक्य द्रष्टव्य हैं →

1. यह मोहन है → अयं मोहन: अस्ति।
2. मोहन गेंद खेलता है → मोहन: कन्दुकं खेलति।
3. मोहन पैरों से गेंद खेलता है → मोहन: पादाभ्यां कन्दुकं खेलति।
4. मैं देश के लिए खेलता हूँ → अहं देशाय खेलामि।
5. हमदोनों घर से बाहर खेलते हैं → आवां गृहाद् बहि: खेलाव:।
6. हमलोग उसकी गेंद खेलते हैं → वयं तस्य / तस्या: कन्दुकं खेलाम:।
7. तुम मैदान में गेंद खेलते हो → त्वं क्षेत्रे कन्दुकं खेलसि।
8. तुम दोनों खिलाड़ी हो → युवां क्रीडकौ स्थ:।
9. तुम लोग भी खिलाड़ी हो → यूयमपि क्रीडका: स्थ।
10. अरे छात्रो! आपलोग क्यों नहीं खेलते हैं? → भो छात्रा! भवन्त: कथं न खेलन्ति?

शिष्टं अपरेद्यु:।

[signature] 07-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य।
रा० उ० सं० महावि० सुरबसेना, पूर्णियाँ।

शास्त्री I (साहित्यम्) 07-06-2021

शिशुपालवधे श्लोकव्याख्या →

पुनरावृत्ति।

"नवानधोऽधो बृहतः पयोधरान् समूढकर्पूरपरागपाण्डुरम् ।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना स्फुटोपमं भूतिसितेन शम्भुना ॥"

अत्र कविः अम्बरात् आयान्तं नारदं वर्णयन् तस्य शिवौपम्यं प्रतिपादयति।

अन्वयः → नवान् बृहतः पयोधरान् अधः अधः समूढकर्पूरपराग-पाण्डुरं क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना भूतिसितेन शम्भुना स्फुटोपमं (अमुं सः क्रमात् नारद इत्यबोधि इति पूर्वेणान्वयः)

व्याख्या → नवान् - नूतनान्, नीलवर्णान्। बृहतः - विपुलान्।
पयोधरान् - मेघान्, पयसां धराः पयोधराः तान्।
समूढकर्पूरपरागपाण्डुरम् - समूढश्चासौ कर्पूरपरागः इव पाण्डुरः, पुञ्जितकर्पूरचूर्णतुल्यधवलम्।
गजेन्द्रकृत्तिना - गजेन्द्र कृत्तिः तेन। भूतिसितेन - भस्मगौरेण, भूत्या सितो भूतिसितः तेन। स्फुटोपमम् - व्यक्तसादृश्यम्, स्फुटा उपमा यस्य सः।

भावार्थः - नवीनान् विपुलान् मेघान् अधोऽधः स्थितम् एकत्रीकृत-कर्पूरचूर्णवद् धवलम् अतएव ताण्डवावसरे स्वशरीरे परिधारितगजेन्द्रचर्मणा भस्मलेपनाद् गौरवर्णेन शिवेन सदृशं प्रतीयमानं तं पुरुषविशेषं भगवान् श्रीकृष्णः 'नारद' इत्यबोधि।

अस्मिन् श्लोके उपमालङ्कारः वंशस्थवृत्तञ्च।

07-06-2021

डॉ० निर्मलकुमार झा, स० प्राचार्य
राधा-उमाकान्त सं० महावि० सुखसेना, पूर्णियाँ
का० सि० द० सं० वि० वि० दरभङ्गा